महाबलः अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः” हरि० ‘अरुणोगरुड़भ्राता जवापुष्पसमप्रभः । योगानाञ्चैव सर्वेषां साध्यानामधिपः कृतः” हरिवं०। “तदुत्पत्त्यादिकथा अनूरुशब्दे” १८१ उक्ता । सूर्य्ये “संसृज्यते सरसिजैररुणांशुभिन्नैः” रघुः “रागेण बालारुणकोमलेन” कुमा०। वर्णे तद्वति च “नयनान्यरुणानि घूर्णयन्” कुमा० “अरुणपुष्पाणि फाल्गुनानि” शत०ब्रा० । “दधत् सन्ध्यारुणव्योमस्फुरत्तारानुकारिणीः” माघः । द्वादशादित्यमध्ये माघमासाधिपे २३आदित्यभेदे “अरुणो माघमासे वै” आदित्यहृदयम् विवरणमादित्यशब्दे । २४देशभेदे पु० । धमादि० वुञ् । आरुणकः तद्भवे त्रि० गुणवचनात् भावे इमनिच् अरुणिमा पु० ष्यञ् आरुण्यम् न० । तल् अरुणता स्त्री त्व अरुणत्वम् न० । रक्तादिवर्णे । अपत्ये इञ् । आरुणिः जटायौ सूर्य्यपुत्रे मन्दे यमे कर्णे वैवस्वतमनौ सुग्रीवे ऋषिभेदे च । अश्विनीकुमारयोः द्वि०व०यमुनायां तपत्यां च स्त्री गुणवचनात् स्त्रीत्वा० अभूततद्भावे क्यङ् अरुणायते अरुणायमानः । गौरा० ङीष् । २५अरुणवर्णायां गवि स्त्री । “अरुण्योगाव उषसामिति” निरुक्तोक्तायाम् २६ उषायामपि स्त्री । २७ मन्दरगिरिस्थे सरोवरे तस्य चारुणजलत्वात्तथात्वम् “सरांस्यथैतेष्वरुणञ्च मानसं महाह्रदः श्वेतजलं यथाक्रमात्” सि०शि० । “एतेषु मन्दरादिविष्कम्भशैलेषु” गुड़कुङ्कुमसिन्दूरादीनाञ्चारुणवर्णत्वात्तथात्वम् ।

**अरुणकमल** न० कृष्णसर्पवत् नित्यकर्म्मधा० । रक्तोत्पले

**अरुणदूर्वा** स्त्री कृष्णसर्पवत् नित्यसमासः । रक्तदूर्व्वाभेदे, “यद्यदाराञ्च विन्देयुः अरुणदूर्व्वा अभिषुणुयात् एष वै सोमस्य न्यङ्गो यदरुणदूर्व्वा तस्मादरुणदूर्व्वा अभिषुणुयात् यद्यरुणदूर्व्वा न विन्देयुः” शत० ब्रा० ।

**अरुणप्रिया** स्त्री अरुणस्य प्रिया । सूर्य्यभार्य्यायाम् १ संज्ञायाम् २ छायायाञ्च अरुणभार्य्यादयोऽप्यत्र “तस्य भार्य्याऽभवत् देवी संज्ञा त्वाष्ट्री विवस्वतः” इति । “असहन्ती तु तां छायां सवर्णां निर्म्ममे ततः । छायामयीं तु सा संज्ञा, तस्याश्छायासमुत्थिता । प्राञ्जलिः प्रणता भूत्वा छाया संज्ञां नरेश्वर ! । उवाच किं मया कार्य्यं कथयस्व शुचिस्मिते ! । स्थितास्मि तव निर्द्देशे शाधि मां वरवर्णिनि ! । संज्ञोवाच । अहं यास्यामि भद्रं ते स्वमेव भवनं पितुः । त्वयेह भवने मह्यं वस्तव्यं निर्विकारया । इमौ च बालकौ मह्यं कन्या चेयं सुमध्यमा । संभाव्यास्ते न चाख्येयमिदं भगवते क्वचित् । छायोवाच । आकचग्रहणा द्देवि ! आ शापान्नैव कर्हिचित् । आख्यास्यामि मतं तुभ्यं गच्छ देवि ! यथेच्छया” । इति हरिवं० । २प्रधाकन्याभेदे च । “सुषुवेऽष्टौ महाभागा प्रधा देवर्षिपूजिताः” । अनुवन्द्या मनूकाञ्च अनूनामरुणप्रियाम् अनुगां सुभगाञ्चैव” हरिवं० अरुणवर्णे पुष्पादि प्रियमस्य । ४रक्तवर्णपुष्पप्रिये सूर्य्ये पु० ५तद्वर्णपुष्पप्रियमात्रे त्रि० ।

**अरुणप्सु** त्रि० अरुणः प्सुः रूपं (निरु०) यस्य । रक्तवर्णरूपे “ऋतावरीमरुणप्सुं विभातीम्” ऋ०५,८०,१, “अरुणप्सुमरुणरूपाम्” भा० । [ २ रक्तनेत्रयुक्ते त्रि० ।

**अरुणलोचन** पु० अरुणे रक्ते लोचने यस्य । १पारावतपक्षिणि

**अरुणसारथि** पु० अरुणः गरुड़ाग्रजः सारथिरस्य । सूर्य्ये विवरणमनूरुशब्दे ।

**अरुणात्मज** पु० ६त० । १जटायौ पक्षिणि । २सूर्य्यपुत्रे मन्दे ३ सावर्णे मनौ ४ कर्णे ५ सुग्रीवे ६ यमे च ७ अश्विनीकुमारयोः द्वि०व० ८ यमुनयां तपत्यां च स्त्री । “लौखपत्यानि कौरव्य ! संज्ञायां तपतांवरः । आदित्यो जनयामास कन्यां द्वौ च प्रजापती । स च वैवस्वतः पूर्व्वं श्राद्धदेवः प्रजापतिः । यमस्य यमुना चैव यमजौ संभूवतुः” । संज्ञायां द्वौ सुतौ सुता चेति लौखपत्यानि । “द्वितीयायां तु संज्ञायां संज्ञेयमिति चिन्तयन् । आदित्यो जनयामास पुत्रमात्मसमं तथा । पूर्व्वजस्य मनोस्तात ! सदृशोऽयमिति प्रभुः । मनुरेवाभवन्नाम्ना सावर्ण इति चोच्यते । द्वितीयायां सुतस्तस्याः स विज्ञेयः शनैश्चरः” । इति सावर्णः शनिश्च एतौ द्वौ सुतौ, संज्ञायाः छायाख्यायां द्वितीयायां सवर्णायां जातौ हरिवं० । वड़वारूपधरिण्यां संज्ञायाञ्च अश्विनीकुमारौ जातौ यथा तत्रैव । “वड़वारूपमास्थाय वने चरति शाड्वले । स तथारूपमास्थाय स्वां भार्य्यां शुभलीलया । ददर्श योगमास्थाय स्वां भार्य्यां वड़वां ततः । अधृष्यां सर्व्वभूतानां तपसा नियमेन च । वड़वावपुषा राजंश्चरन्तीमकुतोभयाम् । सोऽश्वरूपेण भगवांस्तां मुखं समभावयत् । मैथुनाय विचेष्टन्तीं, परपुरुषशङ्कया । सा तन्निरवमच्छुक्रं नासिकायां विवस्वतः । देवौ तस्मामजायेतामश्विनौ भिषजांवरौ । नासत्यश्चैव दस्रस्य स्मृतौ द्वावश्विनाविति” । तपतीशब्दे तदुत्पत्तिः कर्णोत्पत्तिः यथा “एवमुक्ता बहुविधं सान्त्वपूर्व्वं विवस्वता । सा तु नैच्छद्वरारोहा कन्याऽहमिति भारत ! । बन्धुपक्षभयाद्भीता लज्जया च यशस्विनी । तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ ! । मत्प्रसादान्न ते राज्ञि ! भवि-